गुडलिट् । धातोः इति दादिसमानाधिकरणमेतन् न[1], किं तर्हि, [2]तद्विशेषणमवयवषष्ठ्यन्तम्, धातोरवयवो यो दादिः शब्दस्तदवयवस्य हकारस्य [3]इति । किं [4]कृतं भवति ? अधोक् इत्यत्रापि घकारः सिद्धो भवति । कथं [5]दोग्धा, दोग्धुम् इति[6] ? व्यपदेशिवद्भावात्[7] । अथ वा धातूपदेशे यो दादिः इत्येवं विज्ञायते । तथा च दामलिहमिच्छति दामलिह्यति, दामलिह्यतेः क्विप् प्रत्ययः दामलिट् इत्यत्रापि न भवति ॥

## वा द्रुहमुहष्णुहष्णिहाम् । (३३/३२७)

द्रुह मुह [8]ष्णुह ष्णिह इत्येतेषां धातूनां हकारस्य वा घकारादेशो भवति झलि परतः पदान्ते च । द्रुह – द्रोग्धा, द्रोढा[9] । मित्रध्रुक्, मित्रध्रुट् । मुह – उन्मोग्धा, उन्मोढा । उन्मुक्, उन्मुट् । ष्णुह – [10]उत्स्नोग्धा, उत्स्नोढा । उत्स्नुक्, उत्स्नुट् । ष्णिह – स्नेग्धा, स्नेढा । स्निक्, स्निट् । द्रुहेः दादित्वाद् घत्वं नित्यं प्राप्तम्, इतरेषामप्राप्तमेव घत्वं विकल्प्यते ॥

## नहो धः । (३४/४४०)

नहो हकारस्य धकारादेशो भवति झलि परे पदान्ते च । [11]नद्धम् । नद्धुम् । नद्धव्यम् । उपानत् । परीणत् ॥

## आहस्थः । (३५/२४६१)

आहो हकारस्य थकारादेशो भवति झलि परतः[12] । इदमात्थ । [13]किमात्थ । आदेशान्तरकरणं 'झषस्तथोर्धोऽधः' (८.२.४०/२२८०) इत्यस्य निवृत्त्यर्थम् । झलि [14]इत्येव, आह, आहतुः, आहुः ।

[९१८] हृग्रहोर्भश्छन्दसि हस्येति वक्तव्यम् । (म.भा.३.४०४)

'गर्दभेन सम्भरति' (तै. सं.५.१.५.५) । [15]ग्रभीता । जभ्रिरे । 'उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्' (तै. सं. १. १. १३.१) ॥

## व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । (३६/२९४)

व्रश्च भ्रस्ज सृज मृज यज राज भ्राज इत्येतेषाम्[16], छकारान्तानाम्, शकारान्तानां च षकारः आदेशो भवति झलि परतः पदान्ते च । व्रश्च – व्रष्टा । व्रष्टुम् । व्रष्टव्यम् । मूलवृट् । भ्रस्ज – भ्रष्टा । भ्रष्टुम् । भ्रष्टव्यम् । धानाभृट् । सृज – स्रष्टा । स्रष्टुम् । स्रष्टव्यम् । रज्जुसृट् । मृज – मार्ष्टा । मार्ष्टुम् । मार्ष्टव्यम् । [17]कंसपरिमृट् । यज – यष्टा । यष्टुम् । यष्टव्यम् । [18]उपयट् । राज – सम्राट् । [19]स्वराट् । विराट् । भ्राज –[20]विभ्राट् । राजभ्राजोः पदान्तार्थं ग्रहणम्, झलादिराभ्यामिटा पर्यवपद्यते । केचित् तु राष्टिः, भ्राष्टिः इति क्विन्नन्तमिच्छन्ति । छकारान्तानाम् — प्रच्छ – प्रष्टा । प्रष्टुम् । प्रष्टव्यम् । शब्दप्राट् । 'च्छ्वोः शूडनुनासिके च' (६.४.१९/२५६१) इत्यत्र क्ङिति इत्यनुवर्तते इति छग्रहणमिह क्रियते । शकारान्तानाम् – लिश् – लेष्टा । लेष्टुम् । लेष्टव्यम् । [21]लिट् । विश् – वेष्टा । वेष्टुम् । वेष्टव्यम् । विट् ॥

---

1. भवति इत्यधिकम् क. इ. ह. ड. ब. 2. तद्विशेषमेव षष्ठ्यन्तं क. 3. एव ब. ड. 4. एवं इत्यधिकम् ब. ड. 5. दग्धा दग्धव्यं दग्धुम् इत्यधिकम् क. 6. अत्र इत्यधिकम् क. 7. भविष्यति इत्यधिकम् इ. क. 8. नास्ति क. 9. द्रोढुम् इत्यधिकम् क. इ. 10. स्नोग्धा स्नोढा स्नुक् स्नुट् क. 11. नद्धा इत्यधिकम् क, घत्वस्यापवादोऽयम् नद्धा इत्यधिकम् ड. 12. भुवः पञ्चानामादितः आहोब्रुवः इति पदान्ते सम्भवः इति झल्येव उदाह्रियते इत्यधिकम् इ. ह. 13. नास्ति क. 14. इति किम् क. 15 गृभीता क. 16. धातूनाम् इत्यधिकम् ह. 17. कंसपरीमृट् क. 18. उपेढ क. 19. नास्ति क. 20. सुभ्राट् क. 21. शब्दलिट् क, मधुलिट् ह.